S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



**Seldom,** *adv.* क्वचित्, कदाचित्, विरलं, दुर् pr.; 's. to be found' दुर्लभं.

**Select,** *v. t.* वृ 5 U or 10 (वरयति), वृं 9 U, उद्-हृ 1 P, उद्-ग्रह् 9 P, विशिष् 7 P or c. 2 संग्रह्, समुद्धृ, संकल् 10 (कलयति) **-***a.* विशिष्ट, उत्तम, उत्कृष्ट; *See* **Choice.** **-ed,** *a.* वृत, वृत्त, व्यावृत्त, उद्धृत. **-ion,** *s.* वरणं, उद्धरणं, वरः, वृति *f.* 2 संग्रहः, सारः; 's. of poetical pieces' काव्यसंग्रहः.

**Selenite,** *s.* चंद्रकांतः.

**Self,** *a.* आत्मन्, स्व in comp., स्वीय, निज; *See* **Own;** 's.-interest' आत्महितं; 's.-destroyer' आत्मघातकः; (with pronoun) स्वयं, स्वतः. **-***s.* आत्मन् (sing. and *m.*); देवी प्राप्तप्रसवमात्मानं गंगादेव्यां विमुंचति (U. 7). In comp. ex. by आत्म, स्व, or स्वयं, स्वतः; 's.-accomplished' आत्मोपार्जित, स्वतः अर्जित; 's.-command' आत्मसंयमः, दमः, इंद्रियजयः; 's.-conceit' अहंकारः ममत्वं, स्वाभिमानः; s.-denying' आत्मसंयमिन्; 's.-evident' स्वतःसिद्ध, स्वयंप्रकाश, प्रत्यक्ष; 's.-existent' स्वयंभू, आत्मभू; 's.-interested' स्वार्थपर, स्वार्थबुद्धि; 's.-love' ममता, अहंमानः, स्वानुरागः; 's.-possessed' अव्यग्र, स्थिरात्मन्, स्वस्थचित्त, धृतिमत्; 's.-possession' धृति *f.*, स्वास्थ्यं, आत्म-स्व-निष्ठा; *See* **Presence,** (of mind); 's.-sufficient' स्वाभिमानिन्; 's.-will' स्वेच्छा, स्वैरिता, स्वाच्छंद्यं; 's.-willed' स्वैर, स्वैरिन्, स्वच्छंद, काम-स्वेच्छा-चारिन्, कामवृत्ति, स्वैरगति. **-ish,** *a.* स्वार्थपर-निष्ठ-परायण; उदरंभरि, स्वार्थदृष्टि-बुद्धि, स्वहितपर-निष्ठ, स्वहितैषिन्, स्वलाभनिष्ठ-तत्पर, &c. **-ishly,** *adv.* स्वार्थदृष्ट्या, आत्महितबुद्ध्या, स्वलाभेच्छया. **-ishness,** *s.* स्वार्थ-स्वलाभ-स्वहितपरता-निष्ठा-बुद्धि *f.*-दृष्टि *f.*, स्वलाभेच्छा, ममता.

**Sell,** *v. t.* वि-क्री 9 A (rarely P also). **-***v. i.* मूल्येन विक्री pass.; 'this picture will s. for a large price' महता मूल्येनेदमालेख्यं विक्रेष्यते. **-er,** *s.* विक्रेतृ *m.*, विक्रयिन् *m.*, विक्रयिकः, पणायिता. **-ing,** **-***Sale,* *s.* विक्रयः; पणनं; 'exposed for s.' क्रय्य, क्रयार्थं प्रसारित; 'an article for s.' पण्यं, पण्यद्रव्यं; 'underhand s.' अवक्रयः. **-***Saleable,* *a.* विक्रेय.

**Selvage,** *s. See* **Border.**

**Semblance,** *s.* आभासः, आभा, औपम्यं, सादृश्यं; आकारः, रूपं; 'it has a s. of truth' सत्यमिवावभासते, सत्यसंकाशं; 'to wear the s. of displeasure (anger)' कृतककोपं दर्शयितुं.

**Semen,** *s.* शुक्रं, रेतस् *n.*, बीजं, वीर्यं, तेजस् *n.*, इंद्रियं. **-***Seminal,* *a.* (*s.*) in comp.; s. discharge' रेतःस्रावः-क्षरणं, निषेकः.

**Semi,** *a.* अर्ध or सामि in comp.; 's.-circle, वृत्तार्धं, अर्धवर्तुलं; 's.-form' अर्धाकृति &c. &c.

**Seminary,** *s.* बीजारोपणस्थलं. 2 शिक्षणालयः, विद्यामंदिरं.

**Semi-vowel,** *s.* अंतस्थः.

**Sempiternal,** *a. See* **Eternal.**

**Sempstress,** *s.* सूचिका.

**Senate,** *s.* वृद्ध-शिष्ट-सभा; मंत्रि-सचिव-सभा. **-or,** *s.* सभासद् *m.*, वृद्धसदस्यः.

**Send,** *v. t.* प्र-हि 5 P, सं-,प्रेष् c., सं-, प्रेर् c., विसृज् 6 P or c., (with acc. of place and dat. of person); 's. away' प्रस्था c. (स्थापयति), विसृज्; 's. for' आह्वे 1 P, आनी c.; आगम् c., आहृ c.; 's. for a doctor' भिषजमाह्वातुं कमपि प्रेषय; 's. forth' नि-प्र-सृ c., उदीर् c., उत्क्षिप् 6 P, उद्गम् 1 P, उद्-गॄ 6 P; (as a missile) प्र-,मुच् 6 P, प्रक्षिप्, प्रास् 4 P. **-er,** *s.* प्रेषकः, प्रेरकः.

**Senile,** *a.* वृद्ध, जराजन्य. **-ity,** *s.* वृद्धत्वं, जरा, वार्धक्यं.

**Senior,** *a.* ज्येष्ठ, वरिष्ठ, ज्यायस्, वरीयस्, वर्षीयस्; (in age) कालज्येष्ठ, वयोज्येष्ठ; 's. in office' अधिकारज्येष्ठ. **-***s.* ज्येष्ठः, अग्रजः, &c. 2 गुरुः, गुरुजनः, आर्य-वृद्ध-जनः. **-ity,** *s.* ज्येष्ठता, ज्यैष्ठ्यं, वरिष्ठता; वयोज्येष्ठता, &c.; 'according to s.' अनुज्येष्ठं.

**Sennight,** *s.* सप्तरात्रं, सप्ताहः.

**Sense,** *s.* इंद्रियं, हृषीकं, विषयिन् *n.*, 's. s collectively' इंद्रियवर्गः-गणः, पंचेंद्रियं; 's. s of perception or knowledge' ज्ञानेंद्रियाणि; 's. s of action' कर्मेंद्रियाणि, करणानि, कर्मसाधनानि; 'evident to the s.' प्रत्यक्ष, इंद्रिय-ग्राह्य-गोचर; 'pleasures of s.' विषय-इंद्रिय-सुखं, 'object of s.' विषयः, इंद्रियार्थः, इंद्रियविषयः. 2 उपलब्धि *f.*, वेदनं-ना, बोधः, ज्ञानं, अनुबोधः, ग्रहणं, संवेदनं, इंद्रियबोधः-ग्रहणं. 3 बुद्धि *f.*, मति *f.*, धीः, चिच्छक्तिः, प्रज्ञा; *See* **Intellect.** 4 चेतना, संज्ञा, चैतन्यं; ज्ञानं, बोधः, अनुभवः, संवेदनं; 's. of obligation' कृतज्ञता, कृतवेदित्वं; 's. of pleasure' सुखबोधः-अनुभवः; 'come to s. s', 'recover one's s. s' संज्ञां-चेतनां-लभ् 1 A or आ-प्रति-पद् 4 A, प्रकृतिं आ-पद्, प्रकृतिस्थ-*a.*भू 1 P; 'loss of s. s' मतिभ्रंशः, बुद्धि-मति-नाशः, विप्लवः; 'common s.' विवेकः; 'good s.' सुबुद्धिः, सद्भावः; सौजन्यं; 'out of s. s' विगतचेतन, लुप्तसंज्ञ, नष्ट-हत-ज्ञान, बुद्धिभ्रष्ट, नष्टेंद्रिय-बुद्धि;

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007